र्यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ पक्ष-जाते त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्साविरह-विशिष्टसिद्ध्यभावः । इयमनुमितिकारणम् । तत्र पर्व्वते वह्न्यनुमितौ अनुमित्साविरहविशिष्ट-पर्व्वतधर्म्मिकवह्निनिश्चयाभावः । यथा,—
"सिसाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥
इति भाषापरिच्छेदे । ७१ ॥

पक्षतिः, स्त्री, (पक्षस्य मूलम् । "पक्षात्तिः" । ५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं तिथितत्त्वे ।
"पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः"॥) पक्षमूलम् । इत्यमरः । ३ । ३ । ७२ ॥ डानक् इति भाषा ॥

पक्षद्वारं, क्ली, (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्व-द्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीद्वार इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । धृ + अच् ।) चन्द्रः । इति जटाधरः ॥ पक्षधारण-कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्याय्यसाहाय्ये पातः अभि-निवेशः । स्नेहसम्बन्धाद्यनुरोधत एकस्मिन्नेव वर्गे आनुकूल्यप्रयोगचिकीर्षेतिभावः ।) अन्याय्य-साहाय्यकरणम् । (यथा गोः रामायणे २ । १०६ । ५७ ।
"कच्चिद्विवदतोरर्थेषु बलिनो दुर्ब्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥) गणताकरणम् । यथा । "ईश्वरत्वविषये विप-श्चितां पक्षपातकरणे न कारणम्" । इत्युत्तर-मीमांसायां संक्षेपशारीरम् ॥ (पक्षाणां गरुतां पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं "पक्षपातः पतङ्गानाम्" । इति विजयरक्षितः ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—
"न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिता
ऽनवलम्बे किल माद्दशेऽपि सा" ॥
इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य इति पक्षपाती खगस्तस्य भावः । पक्षपातनञ्च ॥)

पक्षपालिः, पुं, (पक्षस्य गृहस्य पालिरिव ।) खड़-क्किका । इति शब्दरत्नावली । खड़कीद्वार इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य पक्ष एव वा भागः ।) हस्तिपार्श्वभागः । इत्यमरः ।२।८।४० ॥

पक्षमूलं, क्ली, (पक्षस्य मूलम् ।) पक्षतिः । इत्य-मरः । २ । ५ । ३६ । डानक् इति भाषा ॥

पक्षवाहनः, पुं, (पक्षौ वाहनमिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षसुन्दरः, पुं, (पक्षे देहाङ्गे कुसुमे सुन्दरः ।) लोध्रः । इति हारावली ॥

पक्षान्तः, पुं, (पक्षस्य अन्तो यत्र काले ।) अमा-वस्या । पूर्णिमा । तत्पर्य्यायः । पञ्चदशी २ । इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविश्लेषः ३ पर्व्व ४ । इति राजनिर्घण्टः ॥ पक्षावसरः ५ । इति शब्दरत्नावली ॥ (अस्मिन् यात्रा निष्फला भवति । यदुक्तं ज्योतिस्तत्त्वे ।
'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्' ॥)

पक्षालुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अस्त्यर्थे आलुच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावसरः, पुं, (पक्षस्यावसरोऽपसरणं यत्र काले ।) पूर्णिमा । अमावस्या । इति शब्द-रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्व्वापरदिने विद्येते यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥ यथा, शुद्धितत्त्वे ।
"द्वावह्नाविकरात्रिश्च पक्षिणीत्यभिधीयते" ॥
पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।) विहगी । शाकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य पानार्थजलस्य शालिका शाला ।) चुण्डीवृताल-वालम् । पक्षिजलपानस्थानम् । इति भूरि-प्रयोगः ॥

पक्षिलः, पुं, (पक्षयति तत्त्वज्ञानं परिगृह्णातीति । पक्ष + बाहुलकादिलच् ।) वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-वान् ॥)

पक्षिशाला, स्त्री, (पक्षिणां शाला गृहम् ।) नीड़म् । तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः, पुं, (पक्षी सिंह इव । उपमितसमासः । यद्वा, पक्षिषु सिंहः श्रेष्ठः । "सिंहशार्दूल-नागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्ते-स्तथात्वम् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पुं, (पक्षिणां स्वामी प्रभुः ।) गरुड़ः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः कक्षादीनां पक्षाणि सन्त्यस्य । "अत इनिठनौ" ।५।२। ११५ । इति इनिः ।) बाणः । इति धरणिः ॥

पक्षी, [न्] पुं स्त्री, पक्षौ विद्येते यस्य । (पक्ष + इनिः ।) विहङ्गमः ॥ पाखी इति चिड़िया इति च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३ विहगः ४ विहङ्गमः ५ विहायाः ६ शकुन्तिः ७ शकुनिः ८ शकुन्तः ९ शकुनः १० द्विजः ११ पतत्री १२ पत्री १३ पतगः १४ पतन् १५ पत्र-रथः १६ अण्डजः १७ नगौकाः १८ वाजी १९ विकिरः २० विः २१ विष्किरः २२ पतत्रिः २३ नीड़ोद्भवः २४ गरुत्मान् २५ पित्सन् २६ नभ-सङ्गमः २७ । इत्यमरः ।२।५।३४॥ नाड़ीचरणः २८ कण्ठाग्निः २९ पतङ्गः ३० अगौकाः ३१ चञ्चु-भृत् ३२ छुरकः ३३ सरकः ३४ । इति शब्द-रत्नावली ॥ पिपतिषुः ३५ पत्रवाहः ३६ द्युगः ३७ । इति राजनिर्घण्टः ॥*॥ गुरुभक्षबहुभक्ष-स्थूलकायपक्षिणां पूर्व्वार्द्धस्य श्रेष्ठत्वं यथा,—
"गुरुभक्षा बहुभुजो ये चोपचितमेदसः ।
एकदेहेऽपि पूर्व्वार्द्धं स्मृगाणां पक्षिणां परम्" ॥*॥
पक्षिणामङ्गादीनामुत्तरोत्तरं गुरुत्वं यथा,—
"सर्व्वेषाञ्च शिरःस्कन्धक्रोडचर्म्मयकृद्गुदम् ।
पादपुच्छान्त्रमस्तिष्कमुष्कक्रोड़ाः समेहनाः ।
धातवः शोणिताद्याश्च गुरवःस्युः परस्परम्" ॥
अस्याण्डगुणाः ।
"मत्स्यकूर्म्मखगाण्डानि स्वादुवाजीकराणि च ।
कटुपाकानि रुच्यानि वातश्लेष्महराणि च" ॥
इति राजवल्लभः ॥ * ॥ तेषामुत्पत्तिर्यथा,—
"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिञ्च जटायुञ्च प्रसूतौ पक्षिसत्तमौ ॥
सम्पातिर्जनयत् गृध्रान् काकाः पुत्रा जटायुषः ।
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ॥
धृतराष्ट्री गरुत्मांस्तु शुन्यां जज्ञे च षट् सुतान् ।
त्रिशिखञ्च सुनेत्रञ्च सुमुखं सुनसन्तथा ॥
सुरूपन्तु सुपर्व्वाणं तेषां पुत्रा अनन्तकाः ।
चतुर्द्दशसहस्राणि क्रूराणां पन्नगाशिनाम् ॥
सप्तद्वीपेष्विमे सन्ति गारुड़ास्ते महाबलाः ।
भासीपुत्रास्तथा भासा उलूकाः काककुक्कुटाः ॥
मयूराः कलविङ्काश्च कपोतौ चैव तित्तिरी ।
क्रौञ्च्यां वाध्रीणसा आसन् कुररा; सारसा बकाः ॥
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भामिनी ।
चक्रवाकांश्च विहगान् सर्व्वेनानौदकान् द्विजान् ॥
अन्यानपि द्विजान् जज्ञे पुत्रपौत्राननन्तकान्" ॥
इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः । यथा, महाभारते १३ । शिवनामकीर्त्तने । १७।६९ ।
"पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः" ॥)

पक्ष्णुः, त्रि, पाककर्त्ता । पच + "ग्लाम्लास्थापचि-पचपरिम्टजः स्नुः" । इति स्नुप्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली, (पक्ष्यते परिगृह्यते आतपतापा-दिकमनेन । पक्ष + करणे मनिन् ।) अक्षिलोम । नेत्रच्छदरोम । (यथा, भागवते । ३ । १ । ३९ ।
"यमावुतस्वित् तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव" ॥)
किञ्जल्कः । केशरः । तन्त्वादेरणीयान् । सूत्रादे-रल्पभागः । इत्यमरभरतौ ॥ गरुत् । पक्षः । इत्यमरमाला ॥

पङ्कः, पुं, क्ली, (पच्यते व्याप्यते क्लिद्यते वाऽनेन । पच् + घञ् कुत्वं च ।) कर्द्दमः । पाँक् इति भाषा । (यथा, हितोपदेशे । १ । ६२ ।
"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संमृतो यथा" ॥
पच्यते व्यक्तीक्रियते दुःखमनेन । पचि विस्तारे व्यक्तीकरणे च । पचधातोरिदित्वात् नुम् । "हल-श्चेति" । ३ । ३ । १२१ । करणे घञ् ततो चित्त्वात् चस्य कुत्वम् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, अम्बाष्टके । ६ । "पङ्का-करे वपुषि कङ्कादिरक्तपुषि कङ्कादिपक्षिविषये त्वं कामनामयसि किं कारणं हृदय ! पङ्कारि-